अशोतिहस्तं द्विकरेण हीनं
कुर्य्याद्गृहं शोभनमेव तस्य ॥
पञ्चायुतेशो नृपमण्डलीको
भवेद्गृहं तस्य कराष्टषष्टिः ।
सामन्त्यमुख्यो ह्ययुताधिपोऽसौ
तद्वेहमष्टेषु करप्रमाणम् ॥
तद्वेश्म पञ्चाशदपि द्विहीनं
सामन्तसंज्ञोऽयुतनाथ एव ।
तथा तृतीयोऽपि ततो द्विहीनं
त्रिंशत्कराष्टाधिकमेव गेहम् ॥
प्रोक्तः प्रवीणैश्चतुराशिकोऽसौ
ग्रामा हि यस्यैव सहस्रमेकम् ।
अष्टाधिकं विंशतिहस्तहर्म्म्यं
सिद्धैः समस्तानि यथोदितानि ॥
ग्रामाधिपा ये तु शताधिपाश्च
ते स्वल्पराष्ट्रा अपि सैनिकाश्च ।
तेषां गृहा अष्टदशाधिकैश्च
करैः समाना मुनिभिर्म्मताश्च ॥
भूपालकार्द्धेन च मन्त्रिगेहं
यथाधिकारेण भवन्ति हीनम् ।
व्यासाद्दशांशाधिकमेव दैर्घं
कूर्य्यादथो पञ्चमभागमिष्टम् ॥
गृहं चतुर्हस्तमितं करादि-
वृद्ध्या द्विरामान्तमिति प्रमाणम् ।
ततः परं भूपतिमन्दिराणि;
यावच्छतं चाष्टकरादियुक्तम् ॥
स्याद्भूमिरेका वसुहस्तगेहे
दशाभिवृद्ध्या द्वितया पुनश्च ।
प्रासाद एवामरभूपयोश्च
हर्म्म्याणि लोके मुनिनोदितानि
शालाया नवधा च पञ्चकरतो मानश्च विस्तान्तकं
भित्तेरेव चतुर्द्दशाङ्गुलमितिर्यावत् सपादं करम् ।
आगारस्य तु षाड़शांशरहितोऽप्यर्द्धेन हीनोऽथवा
भित्तेर्मानमिदं त्रिधा विरचितं कल्प्यं यथायोगतः ॥
दैर्घ्ये चन्द्रकलाङ्गुलोत्तमशिला मध्याङ्गुलो नान्तिमा
व्यासे दिङ्नवभूश्रदुच्छ्रितिरपि त्रिंशेन विस्तारतः ।
हस्तादेस्त्रिकरोदयं नवविधं पीठं गृहे सर्वतो
विप्रादे रसभूतवेदगुणकाः स्युः पीठक मेखलाः ॥
पद्या वाथ शतार्द्धसप्ततियुतैर्व्यासस्य हस्ताङ्गुले-
द्वारस्योदयको भवेच्च भवने मध्यः कनिष्ठोत्तमैः
दैर्घ्यार्द्धेन तु विस्तरः शशिकलाभागोऽधिकः सप्तते-
र्दैर्घ्यं त्र्यंशविहीनमर्द्धरहितं मध्यं कनिष्ठं क्रमात् ॥
ज्येष्ठा प्रतोली तिथिहस्तसंख्या
प्रोक्तोदये विश्वकरा च मध्या ।
कनिष्ठिका रुद्रकरा क्रमेण
व्यासेऽष्ट सप्तैव च रागसंख्या ॥
वेश्मन्यामकलांशकैर्युगगुणैर्हस्तैस्त्रिसार्द्धैर्युते-
र्हर्म्म्यास्य त्रिविधोदयः क्षितितलाद्यावच्च पट्टोर्द्ध्वकम् ।
एकैकोऽपि पुनस्त्रिधा निगदितः सर्वे त एकादश
क्षेपाः षण्णवती नखाः शशिकला अष्टादशाद्यास्त्रिधा ॥
त्रिस्थाने युगपर्वताः८४स्तिथियुता धिष्ण्यैक-विंशान्विता
मध्योऽयं त्रिकरैस्तदंशसहितैः प्रोक्तः कनिष्ठस्त्रिधा ।*।
वृक्षं दुग्धविशुष्ककण्टकयुतं नीड़ैस्तु चैत्यद्रुमं
घोरं मारुतपातितञ्च भवने चिञ्चाविभीतं त्यजेत् ॥
शाकः शालमधूकसर्ज्जखदिरा रक्तासनाः शोभना
एकोऽसौ सरलोऽर्ज्जुनश्च पनसः श्रीपर्णिनी शिंशपा ।
हारिद्रः पिचुमर्द्दचन्दनतरुः पद्माख्यकस्तिन्दुकी
नैतेऽन्ये न युता भवन्ति फलदाः शाकादयः शोभनाः ॥*॥
गेहोदयन्तु नवधा विभजेत् षड़ंशं
स्तम्भोर्द्ध्वभागसमकं भरणं शिरश्च ।
कुम्भी ह्युदम्बरसमैकविभागतुल्या
पट्टश्च तत्त्रिकयुतोऽशसमान एव ॥
शालालीन्द उदाहृतो हि विबुधैर्बाणेषु युग्मांशकः
सप्तांशेषु गुणैश्च नन्दपदतो वेदांशतुल्यस्तथा ।
कापाटं गृहदक्षिणे निगदितं वामे भवेदर्गला
दृष्टा निष्क्रमणं कृतं मुनिवरैर्द्वारेषु सर्वेषु यत् ॥
शालाजिनांशैमनुरेव मध्ये
त्रयो हयान्ते द्वयमस्य पार्श्वे ।
द्वारोत्तमाङ्गेन समानकर्णाः
शस्ता न शस्ता भवनाभिवक्राः ॥*॥
दीपालयो दक्षिणदिग्विभागे
सदा विधेयोऽर्गलया समानः ।
वामे च मध्ये न शुभाय गेहे
सुरालये वामदिशीष्टसिद्धैः ॥
द्वाराग्रे खटकीमुखे च तदधो द्वाः षोड़शांशाधिकं
सर्व्वं वा शुभमिच्छता च सततं कार्य्यन्तु पट्टादधः ।
तन्न्यूनं न शुभन्तुलातलगतं कुक्षौ तथा पृष्ठगं
काष्ठं पञ्चक एव नीतरहितं यन्मूलपूर्वान्तरम् ॥
द्वारोर्द्ध्वं यद्द्वारमस्य प्रमाणं
संकीर्णं वा शोभनं नाधिक तत् ।
क्रस्वद्वाराण्येव यानि पृथूनि
तेषां शीर्षाण्येकसूत्राणि कुर्य्यात् ॥
सर्वं द्वारं नीचमानं रुजायै
यद्वा क्रस्वं तत् करोत्यर्थनाशम् ।
गेहाद्यं यत् पूर्व्वं वास्तुस्वरूपं
तेषां भङ्गान्नैव सौख्यं कदाचित् ॥
द्वारव्यासरदांशतोऽधिकमिदं कार्य्यं गृहं दक्षिणे
तुल्यं हस्तिगृहञ्च वाजिभवनं तेनाधिकं वामतः ।
षष्टांशेऽथ नवांशके च वितथे तोये जयेन्द्रे हितं
द्वारं सौम्यगृहक्षते च कुसुमे भल्लाटके शस्यते ॥
प्राग्द्वाराष्टकमध्यतोऽपि न शुभं सूर्य्येशपर्जन्यतो
याम्यायाश्च यमाग्निपौष्णमपरे शेषासुरं पापकम् ।
सौम्यायामथ रोगनागगिरिजं त्याज्यं तथान्यच्छुभं
कैश्चिद्द्वारुणसौम्यकं न हि हितं प्रोक्तञ्च वातायने ॥
द्वारं विद्धमशोभनञ्च तरुणाकोणभ्रमस्तम्भकैः
कूपेनापि च मार्गदेवभवनैर्विद्धं तथा कीलकैः ।
उच्छ्रायाद्द्विगुणां विहाय पृथिवीं वेधो न भित्यन्तरे
प्राकारान्तरराजमार्गपरतो वेधो न कोणद्वये ॥
दैर्घ्ये सार्द्धशताङ्गुलञ्च दशभिर्हीनम् १४०।१३०।
१२०।११० चतुर्थो विधिः
प्रोक्तं वाथ शतं त्वशीतिसहितं १८० युग्मं २००
नवत्या शतम् १९० ।
तद्वत् षोड़शभिः शतञ्च ११६ नवभिर्युक्तं तथाशीतिकम् ८९
द्वारं मत्स्यमतानुसारि दशकं योग्यं विधेयं बुधैः ॥*॥
स्वयमपि च कपाटोद्घाटनं वा पिधानं
भयदमधिकहीनं शाखयोर्वा विचाले ।
पुरुषयुवतिनाशस्तम्भशाखाविहीनं
भयदमखिलकाष्ठाग्रं यदाधःस्थितं स्यात् ॥
देवालयं वा भवनं मठश्च
भानोः करैर्वायुभिरत्र भिन्नम् ।
तन्मूलभूमौ परिवर्जनीया
छाया गता यस्य गृहस्य कल्पे ॥
नैको लघुर्वामदिशाविभागे
मर्ध्ये द्विषट् दारुणवर्णगेहे ।
स्तम्भासनं हीनमपि क्षयाय
यदाधिकं रोगकर तदा स्यात् ॥
स्तम्भोऽष्टास्रसुवृत्तभद्रसहितो रूपेण चालङ्कृतो
युक्तः पल्लवकस्तथाभरणकं यत् पल्लवेनावृतम् ।
कुम्भी भद्रयुता कुमारसहितं शीर्षं तथा क्षिप्रराः
पवर्षेति गृहे न शोभनमिदं प्रासादके शस्यते ॥
स्तम्भो द्वयोर्मध्यगतो न शस्तो
शुभंकरौ पट्टयुगांशतो द्वौ ।
गृहे प्रशस्ताश्चतुरस्रकास्ते
स्तम्भा न कन्देन विना प्रशस्ताः ॥
हानिस्तुलामध्यगता खनस्य
स्तम्भभदन्तालयभित्तिमूलम् ।